तच्चाज्ञानशब्दे विस्तरेण वक्ष्यते । प्राज्ञः प्रकर्षेणाज्ञः सुषुप्त्यवस्थापन्ने जीवे तदानीं विशेषज्ञानाभावात् प्राज्ञत्वम् । अचेतने, जडे, "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्येति" सांख्यका० । अल्पज्ञे, किञ्चिज्ज्ञे च ।

**अज्ञात** त्रि० न ज्ञातः । ज्ञानाविषयीभूते पदार्थे । "अज्ञातकुलशीलस्य वासोदेयो न कस्यचित्" इति हितोप० ।

**अज्ञान** न० न ज्ञानम् । ज्ञानाभावे, ज्ञानविरोधिनि तदभावे "तत्राज्ञानं धिया नश्येदिति" वेदान्तिमतसिद्धे पदार्थान्तरे च "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव" इति गीता । "अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकयेति, गुरुनतिः । अज्ञानञ्च ज्ञानाभाव इति नैयायिकाः । पदार्थान्तरमिति वेदान्तिनः । तथाहि अहं न जानामि अहमज्ञ इत्यादिविशिष्टानुभवः सार्वलौकिकः स च ज्ञानाभवविषय इति नैयायिकैर्यदुक्तं तन्न युक्तं विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतायाः सर्ववादिसिद्धतया आत्मधर्म्मिकज्ञानाभावप्रकारकज्ञाने जनयितव्ये तद्विशिष्टज्ञानाभावघटकज्ञानरूपस्य विशेषणस्य ज्ञानं पूर्व्वमपेक्षितम् आत्मनि तादृशे ज्ञाने च तदानीं सति कथङ्कारं ज्ञानाभावविशिष्टबुद्धिः स्यात् यस्मिन् धर्म्मिणि ज्ञानमस्ति तत्र ज्ञानाभावज्ञानस्य बाधितत्वमेव अभावबुद्धेः प्रतियोगिज्ञानरोधितायाः सर्वमतसिद्धत्वात् । किञ्च ज्ञानाभावः किं ज्ञानसामान्याभाव उत तत्प्रागभावः अथ तद्ध्वंसो वा तत्र विषयो भवति, नाद्यः पूर्व्वोक्तयुक्त्या ज्ञानाभावानुभवासम्भवेन प्रत्याख्यातत्वात् । न द्वितीयः प्रागभावस्य सामान्यधर्म्मानवच्छिन्नप्रतियोगिताकतया तत्तज्ज्ञानप्रागभावस्यैव विषयता वाच्या सा च न सम्भवति सामान्याकारेण ज्ञानाभावस्यैव प्रतीयमानत्वात् अन्यथा ज्ञानवत्यपि पुरुषे तादृशप्रतीतिः स्यात् अग्रे जनिष्यमाणानन्तज्ञानप्रागभावानामात्मनि सत्त्वेऽपि तेषाञ्च तत्तज्ज्ञानप्रतियोगिकत्वेन ज्ञानसामान्यविशिष्टबुद्धौ विरोधिताभावात् । नान्त्यः प्रागभावरीत्या तस्यापि प्रत्याख्यातत्वात् । अतस्तादृशानुभवस्य विषयरक्षार्थं ज्ञानाभावातिरिक्तमज्ञानं कल्पनीयम् । तच्चानुमानेनैव । अनुमानञ्चेत्थमुक्तं प्रमेयविवरणोपन्यासे । विवादाध्यासितं ज्ञानं स्वप्रागभावातिरिक्तस्वविषयावरकस्वविषयकवस्तुपूर्व्वकं भवितुमर्हति प्रकाशत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । यथा अन्धकारे प्रथमोत्पन्ना प्रदीपप्रभा स्वविषयस्य घटादेरावरकतमोरूपपदार्थपूर्व्विका एवं ज्ञानमपि प्रकाशत्वसाम्यात् स्वविषयस्य घटादेरावरकं कञ्चित् पदार्थं समानविषयकं नियतम् पूर्व्वमपेक्षते । उत्पन्ने च ज्ञाने प्रदीपप्रभया तम इव तन्निवर्त्तते ज्ञानप्रागभावेन सिद्धसाधनतावारणाय स्वप्रागभावातिरिक्तेति विशेषणम् । तच्च अज्ञानं ज्ञानविरोधि सत्त्वासत्त्वाभ्यामनिर्वचनीयम् । तच्च शुक्तिकाद्यज्ञानं शुक्तौ रजतादिकमिव ब्रह्मणि प्रपञ्चमुत्पादयति । अतएव तद्भावरूपं भावस्यैव भावपदार्थोपादानत्वसम्भवात् । अभावस्य तु अधिकरणस्वरूपत्वाङ्गीकारात् न भावस्याभावोपादानत्वव्याघातः । तस्य भावरूपत्वेऽपि न त्रैकालिकाबाध्यत्वरूपम् सत्त्वं तत्त्वज्ञानेन बाध्यत्वात् नापि प्रातीतिकरजतादिवदसत्त्वम् व्यवहारयोग्यत्वात् । अतः सदसद्भ्यामनिर्वचनीयं व्यवहारिकसत्त्ववत् यत् किञ्चित् भावरूपं पदार्थान्तरमेवाज्ञानमिति सुस्थितम् । अस्य चाज्ञानस्य द्वे शक्ती आवरणं विक्षेपश्च तत्र या कदाचित् स्वविषयमावृणोति (विषयत्वसंप्राप्त्यनर्हं करोति) सा आवरणशक्तिः या तु स्वकार्य्यबुद्धिवृत्त्या इन्द्रियादिद्वारा विषयदेशं प्राप्य विषयगतं स्वकारणनिष्ठावरणशक्तिं नाशयति सा विक्षेपशक्तिः यथोक्तं "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येत् आभासात्तु घटः स्फुरेदिति" । यथा च शुक्तिविषयाज्ञानं स्वविषयशुक्तिमावृत्य स्वशक्त्यैव तत्र उत्पादितं रजतं विषयीकृत्य तद्गतमावरणशक्तिं नाशयति एवं ब्रह्मविषयकाज्ञानं स्वशक्त्यैव ब्रह्मणि उत्पादितं प्रपञ्चं विषयीकृत्य तत्तदाकारबुद्धिवृत्तिरूपा विक्षेपशक्तिः तद्गतावरणशक्तिं निवारयतीति दृष्टानुसारिणीयं कल्पना । अधिकमाकरे द्रष्टव्यम् । नास्तिविशिष्टज्ञानमस्य । विशिष्टज्ञानाभाववति अज्ञे त्रि० ।

**अज्मन्** स्त्री अजति गच्छति स्वर्गं दानेनानया अज-करणे मनिन् न वीभावः । गवि, इति निरुक्तकारः ।

**अञ्चति** पु० न० अन्च-गतौ कर्त्तरि अति । वायौ, गन्तरि त्रि० ।

**अञ्चल** पु० अञ्चति प्रान्तम् अन्च-अलच् । वस्त्रप्रान्ते "क्षौमाञ्चलमिव पीनस्तनजघनायाः कुलीनायाः" इति "भूमौ दत्त्वा पदमिह समाधेहि चेलाञ्चलेऽस्मिन्निति च उद्भटः । प्रान्तभागे "दृगञ्चलैः पश्यति केवलं मनागिति" उद्भटः ।

**अञ्चित** त्रि० अन्च-क्त । पूजिते, आकुञ्चिते च । "अपिखञ्जनमञ्जनाञ्चितमिति" नैष० । "अञ्चितसव्यपाद इति" भट्टिः । "अञ्चितः शूलपाणिरिति" पुरा० । ग्रथिते च "अर्द्धाञ्चिता सत्वरमुत्थितायाः" इति रघुः ।